International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(3): 129-131
© 2021 IJSR
www.anantaajournal.com
Received: 15-03-2021
Accepted: 25-04-2021

**डॉ० कुमारी रंजु**
पूर्व शोधार्थी, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर, दरभंगा, बिहार, भारत

Corresponding Author:
**डॉ० कुमारी रंजु**
पूर्व शोधार्थी, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर, दरभंगा, बिहार, भारत

# आधुनिक युगे शक्तिजय महाकाव्यस्य प्रासंगिकता

## डॉ० कुमारी रंजु

### सारांश
साम्प्रतिके युगे विज्ञानस्य महन्मत्त्वं प्रतीयते। अद्य विज्ञानं काव्य माध्यमेन प्राकृतिकानि वस्तून्यपि आत्मसात् कर्तुं प्रयतमानमस्ति। आधुनिक युगं विज्ञानयुगं गण्यते। सर्वतो विज्ञानवार्ता प्रचरति। पदे - पदे, स्थाने-स्थाने, प्रतिनगरं प्रतिग्रामं प्रतिगृहं च विज्ञानस्याश्रयणेनैव कर्मसिद्धिः संजायते। नहि तादृशं किमपि कर्म यत्र विज्ञानं नापेक्ष्यत, विज्ञानं वोपेक्ष्येत, विज्ञानस्य साहाय्यं वा नाभीष्टं स्यात्। गमने, पठने, भाषणे, वाग्व्यवहारे, भोजनदिकर्मणि, यातायाते, संवादसम्प्रेषणे, चिकित्साक्षेत्रे, मनोरञ्जनकर्मणि, दूरदेश यात्रासु, वस्तु निर्माणे, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि, भवन निर्माणे, व्यापारे, वाणिज्ये, वैज्ञानिकनुसन्धने, चन्दादिग्रहप्राप्तौ, विलासिता - सामग्री - संकलने च सर्वत्रैव विज्ञानम् अपेक्ष्यते।

**कूटशब्द:** विज्ञानयुगं, कर्मसिद्धिः, वस्तु निर्माणे, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि

### प्रस्तावना
आधुनिक युगे विज्ञानस्य दोषा विविच्यन्ते विश्लिष्यन्ते चेत् तर्हि दोषपक्षोऽपि तथैव प्राबल्यं धत्ते, तत्रापि बहु निगदितुं शक्यम्। यथैव महदुपकृतं मानसंसृतेविज्ञानेन, तथैव प्रभूतमपवृतमपि। तत्र समासतः केचन दोषा उपस्थाप्यन्ते। आधुनिक भौतिक युगे जीवनम् असंयतम्, चरित्रहीनम्, धर्महीनम्, स्वास्थ्यहीनम्, मनोबलहीनम्, इच्छाशक्तिहीनम्, आधि-व्याधि-ग्रस्तम्, चिन्तासहस्त्र- निश्चितम्, व्याधिसहस्त्रोपचितम्, कर्मठताविरहितम्, सालसं च व्याधिपि। धर्माभावे, आस्तिश्यबुद्धयभावे चरित्रिकोत्कर्षभावे च कीदृशी समुन्नतिः कीदृशो वा विकास इति न शक्यं वर्णयितुम्। रोगोपशमनार्थं सत्स्वपि सहस्त्रशो भेषजेषु रोगाः सुरसाराक्षसीमुखबद् वर्धन्ते।
विज्ञानप्रभावेण तथा जीवने प्रतिस्पर्धा वृद्धिमुपागता, यथा प्रतिस्पर्धायामेव जीवनं राष्ट्र समाजो वा संक्षयमुपैति।

विज्ञानिके विकासे सदाचारस्य सहानुभुतेः शीलस्य विनयस्य च स्थानमेव नोपलभ्यते। धीरत्वम्, वीरत्वम्, आस्तिवयम्, तपः पूतत्वम्, स्नेह-श्रद्धा भक्तयः सदाचारश्च तुषार-पात-हतकमलानीव म्लायन्ते, हीयन्ते, विनिश्यति च।

वैज्ञानिकेऽस्मिन युगे धनिनो धनवत्तराः निर्धना निर्धनतारश्च संलक्ष्यन्ते। आस्तिक्यस्य, पावनत्वस्य, सद्वृत्तरवस्य च नामान्यपि विलुप्यन्ते। भौतिकौन्नतिलिप्सायां सत्यां विश्वशान्तेः विश्वप्रेम्णः, विश्वधर्मस्य, विश्वकल्याणादिकस्य च स्वान्त संस्कर्त्री सकैदयप्रवणा पूता भावनैव न मानसपटलं जागरयति। तत्प्रभावेणैव वर्णेषु वर्गेषु जातिषु समाजेषु राष्ट्रेषु च प्रतिस्पर्धा, शत्रुत्वभावना, परसंहारचिन्ता, परार्थनाशनपूर्वकं स्वार्थसाधनकामना, चानुदिनं समेधते।

आधुनिक वैज्ञानिक युगे शक्तिजय महाकाव्य सदृशस्य उपदेषात्मक ग्रन्थस्य पदे पदे उपयोगिता विद्यते। आलोच्य काव्यं ज्ञानोदयसाधनम्, बुद्धिं विकासयति मेधां प्रोचयति, धियं समिन्धे, प्रज्ञां प्रज्वलयन्ति। लोके काव्यैव तद् ज्योतिः यद् मानवैज्ञानज्योतिर्ज्वलयति, अविद्यान्धतमसं व्यपोहति, दुर्गुणगणं वारयति, सद्गुणततिं संचारयति, कीर्ति प्रथयति, गौरवं विकासयति, यशो वितनोति, भूभृत्सु च आदरम् आवहयति। शक्तिजयकाव्येनैव ब्रहमपथस्य साधु दर्शनात् तदमिमुखत्वम्। तेन च मोक्षाधिगमः। एतदेवाभिप्रेत्य प्रोच्यते "ऋते ज्ञानान्न मुक्तिः"। गीतायामपि भगवता कृष्णेनैतदेव समर्थ्यते यद् यथा-

समिद्धो वहिणः समिधे भस्मसाद् विद्यते।

तथैव ज्ञानाग्निः सर्वकर्माणि विनाशयति भस्मावशेषं च विद्यते।

भोला शंकर व्यासस्य दुर्गा देव्या प्रति असीम श्रद्धा अस्ति। सः सीता देव्या एवञ्च राधादेव्या दुर्गादेव्या अवतारो मन्यते। यथा-

सीता स्वयं सा भुवनस्य धात्री समागता रामगृहे च लक्ष्मीः।
आद्यैव शक्तिर्भवरक्षणाय जाता पृथिव्या जनकस्य कन्या।
कृष्णस्य माया परमेव शक्तिः काचिच्च लोकप्रथिताऽप्यदृश्या।
दृश्या च राधा पुरगोपजाता रासेश्वरी या शरदः प्रभेय।

शक्तिजय महाकाव्ये राक्षसः शुंभ-निशुम्भस्य दुर्गा देव्या द्वारा मृत्यु भवति। अधर्मस्योपरि धर्मस्य विजयं भवति। शक्तिजय महाकाव्यस्य परमलक्ष्यः मोक्षः विद्यते। तेन स्वकीय महाकाव्ये अस्य उल्लेखः कृतोस्ति-

निखिलजगतीमामोदाङ्कां तनोति सुगन्धिता।
परशिवकला भूमिश्चास्ते महाफलकारणम्।
जयति विनतानन्दास्वादास्पदं।
पदमुच्चकैर्हरतरूवरस्येयं रम्या महारसमञ्जरी।
(शक्तिजय महाकाव्यम्)

अत्र आम्रमञ्जरी माध्यमेन पराशक्ति वर्णनम् विद्यते। यः परमशिवस्य वृक्षोपरि अत्यधिकः उतंगोस्ति एवञ्च परमानन्दैन युक्तोस्ति एवञ्च महाफल अर्थात् मोक्षस्य वा जीवनमुक्ति कारणम् विद्यते।

आधुनिकयुगे शक्तिजय महाकाव्यस्य प्रसांगिकता अधिको विद्यते। मानवाः अस्य काव्यस्य सन्देशं येन रूपेण इच्छन्ति। तेन रूपेण प्राप्नुवन्ति। देवी दुर्गा देव्या सर्वेषां कृते अनुकरणीया विद्यते। स्त्रीणाम् कृते तु परममौषधम् विद्यते। सत्यं वद् धर्मं चरं, स्वाध्यायान्माप्रमद, वसुधैव कुटुम्बम्, तेन त्यक्तेन मुञ्जीथाः, अहिंसा परमो धर्मः, सदाचारी भव इत्यादयः सन्ति अस्माकं संस्कृतेः मूलभूतानि तत्वानि। अनेनैव भारतस्य प्रतिष्ठा भुवि प्राक्तनाद् कालाद् विराजते। यथा-

एतद्देशप्रशूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन पृथिव्यां सर्वमानवाः।।

अस्य संस्कृत ग्रन्थस्य मूलतत्त्वानामाकलनं यूरोप-अमेरिका-चीन-जापानदिदेशानां दार्शनिकैः साहित्यकारैश्च कृतम्। सुविख्यातेन वैज्ञानिकेन तथा य एनिल्ड-टायन्बी-नामकेन इतिहासकारेणापि अस्याः भूरिशः प्रशंसा कृता। नोबेल पुरस्कार विजेता जनेस्टीनः कथयति वर्तमानकाले आणविक-नाभिकीय अर्जादि-युद्धानां भयेभ्यः रक्षणाय-भारतीय शक्तिजय विचारधारा संस्कृतिश्चैकमात्रं सदुपायमस्ति।

निखिनेऽस्मिन् संसारे सर्वत्र दुर्गादेव्या चरितस्य संस्कृतेश्च सुप्रभावः दृश्यते। अतः आधुनिक समये शक्तिजय महाकाव्यस्य सन्देशः सर्वजनानां कृते परमावश्यको विद्यते। दुर्गादेव्या सदृश्या देव्याः उपदेशः सर्वेषां मानवानां कृते अनुकरणीयो विद्यते। सा स्वकीय पुत्राणां सम्बोधने चरकथयति तद् अद्वितीयो विद्यते। अस्मिन् उपदेशे सन्देशे च धर्म, अर्थ, काम विद्यते। अतएव शक्तिजय महाकाव्यस्य प्रासंगिकता आधुनिकयुगे पगे-पगे वर्त्तते।

शक्तिजयमहाकाव्यस्य कस्य काव्ये अन्तर्भावः क्रमे मया प्राप्यते यत् अस्य काव्यस्य महाकाव्ये अन्तर्भावो विद्यते। कथंतु सर्गवन्धो महाकाव्यम्। अस्मिन महाकाव्ये षोडश सर्गा विद्यन्ते। महाकाव्य लक्षणानुसारेण अस्मिन् काव्ये अष्टाधिकसर्गेः कथावस्तुनः विभागः स्यात्। नायकः धीरोदात्त प्रकृतिकः कुलीनः क्षत्रियो देवो वा । अस्य लक्षणानुसारं यद्यपि आलोच्च महाकाव्यं उपयुक्तं नास्ति। कथंतु अस्मिन् महाकाव्ये दुर्गादेव्या प्रमुख पात्रोऽस्ति। किन्तु कथानकस्य अवलोकनेन मया प्राप्ते यत् अस्य महाकाव्ये शिवस्य प्रधानता विद्यते। शिवस्यानुसारेण दुर्गा देव्यामपि सर्व काव्यं करोति। अतएव मम दृष्ट्या अस्य महाकाव्यस्य नायकः भगवान् शिवो महाकाव्यलक्षणानुसारेण महाकाव्ये विद्यते।

श्रृङ्गारवीरशान्तानाम् एकः अङ्गी रसो भवेत् अन्ये चाङ्गानि। अस्य लक्षणानुसारेण अयं महाकाव्योस्ति। कथंतु अस्य महाकाव्ये वीररस्य प्रधानता विद्यते। सर्वे नाटकसन्धयः स्यु। अनेन दृष्ट्यापि अयं महाकाव्यो विद्यते। धर्मार्थकाममोक्षणां प्रतिपादनं स्यात् फलं तु तेष्वेक्ष्मेव। अनेन दृष्ट्यापि आलोच्य ग्रन्थः महाकाव्योस्ति वृत्तम् ऐतिहासिकं सज्जनाश्रयं वा। अनेन दृष्ट्यापि महाकाव्यस्य रचना समीचिनो विद्यते। कथंतु अस्य महाकाव्यस्य आधार ग्रन्थः दुर्गासप्तशती विद्यते। यः ऐतिहासिक घटनाया आधारितो विद्यते। प्रकृति-युद्ध-यज्ञादितत्त्वानां वर्णनं भवेत्। अनेन दृष्ट्यापि आलोच्य महाकाव्यं परिपूर्णो विद्यते। कथंतु अस्मिन् महाकाव्ये विविध राक्षस मध्येदुर्गा देव्यायाः युद्धं भवति। सर्गान्ते भाविसर्गस्यकथायाः सूचनं भवेत्। सर्गनाम सर्गोपादेयकथया सर्गः एकवृत्तयः। सर्गान्ते विभिन्नच्छन्दसां श्लोकाः स्युः। महाकाव्यस्य नाम कवेः वृत्तस्य नायकस्य अन्यस्य वा नाम्ना भवेत्। अनेन दृष्टयापि आलोच्य महाकाव्ये महाकाव्यस्य लक्षणं घटयति।

शक्तिजय महाकाव्ये 16 सर्गाः सन्ति। अत्र दुर्गादेव्या एवञ्च शुंभ-निशुंभ राक्षस्य कथा निबंद्धा विद्यते। कथावस्तुनः प्रारम्भो शुम्भचरिताद् भवति। अस्य ग्रन्थस्य कथानक दुर्गासप्तशती ग्रन्थाश्रितं विद्यते। अस्य नामकरणमस्य कथानकं दुर्गासप्तशती ग्रन्थाश्रितं विद्यते। अस्य नामकरणमस्य प्रधान पात्र आधारितं विद्यते। वीर रसः चाङ्गभूता विद्यन्ते। धर्मार्थकाममोक्षाणां सम्यक्तया विवेचनम् विद्यते। सर्व सज्जनाश्रिषं विद्यते। प्रकृत युद्धादि क्रियाया अपि वर्णनम् स्थाने-स्थाने विद्यते। आलोच्य महाकाव्यस्य भाषा सरला, सरसा, वृत्तान्तम् ऐतिहासिक मधुरा, प्रसाद गुणोपेता चास्ति। भाषायां सर्वत्र स्वाभाविकता विलसति, कवचिदपि कृत्रिमं पाण्डित्यं नावलोक्यते। अलङ्कारयोजनायामपि स्वाभाविकता वर्तते।

**संदर्भ :**


1. शक्तिजय महाकाव्यम्, प्रो० भोला शंकर व्यास, राजस्थान संस्कृत अकादमी, 1975
2. संस्कृत कवि दर्शनः, डा० भोल शंकर व्यास, चौखम्बा प्रकाशन, वाराणसीतः, 1983
3. संस्कृत भाषा शास्त्रीय अध्ययनः, बलदेव उपाध्यायः, विश्वविद्यालय प्रकाशन, वाराणसीतः, 1978
4. संस्कृत साहित्य विमर्शः, श्री द्विजेन्द्र नाथ शास्त्री, भारतीय प्रकाशन, मेरठतः, 1956
5. साहित्य दर्पणः, कृष्णमोहन ठक्कुरः, ज्ञान मण्डल लिमिटेड, वारणसीतः, 1993